योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः ८२

द्व्यशीतितमः सर्गः ८२

श्रीवसिष्ठ उवाच ।

विचार एवं विदुषा संवर्तेन कृतः पुरा ।

कथितो मम विन्ध्याद्रौ तेनैव विदितात्मना ।। १

एतां दृष्टिमवष्टभ्य विचारपरया धिया ।

संसारसागरादस्मात्तारतम्येन संतर ।। २

अथेमामपरां राम शृणु दृष्टिं पदप्रदाम् ।

मुनिना वीतहव्येन ययाऽऽस्थितमशङ्कितम् ।। ३

वीतहव्यो महातेजा विबभ्राम वने पुरा ।

विन्ध्यशैलदरीर्दीर्घा रविर्मेरुदरीरिव ।। ४

अस्मात्क्रियाक्रमाद्धोरात्संसारभ्रमदायिनः ।

आधिव्याधिमयाकारात्कालेनोद्वेगमाययौ ।। ३

निर्विकल्पसमाध्यंशलभ्योदारपरेच्छया ।

स जहार जगज्जीर्णां स्वव्यापारपरम्पराम् ।। ६

विवेश रम्भारचितं निजं पर्णोटजान्तरम् ।

कृतगौरं सुसौगन्ध्यमलिनीलमिवोत्पलम् ।। ७

तत्रासने समे शुद्धे स्वास्तीर्णहरिणाजिने ।

विशश्रामाचले शान्ते वीतवर्ष इवाम्बुदः ।।

बद्धपद्मासनस्तस्थौ पार्ष्ण्योरधिकराङ्गुलिः ।

शृङ्गवच्छान्तचलनमतिष्ठत्स्पष्टकन्धरम् ।। ९

स जहारालमालोकाद्दिग्विकीर्णं मनः शनैः ।

विशन्मेरुदरीं सायं भानुर्भास इवोत्करम् ।। 5.82.१०

बाह्यानाभ्यन्तरांश्चैव स्पर्शान्परिजहत्क्रमात् ।

इदमाकलयामास मनसा विगतैनसा ।। ११

अहो नु चञ्चलमिदं प्रत्याहृतमपि क्षणात् ।

न मनः स्थैर्यमायाति तरङ्गप्रौढपर्णवत् ।। १२

चक्षुरादिभिरुद्दामै रूपैराहितसंभ्रमैः ।

अजस्रमुत्पतत्येव वीटेव तलताडिता ।। १३

त्यजदेवानुगृह्णाति वृत्तीरिन्द्रियवर्धिताः ।

यस्मान्निवार्यते तस्मिन्प्रोन्मत्त इव धावति ।। १४

घटात्पटमुपायाति पटाच्छकटमुत्कटम् ।

चित्तमर्थेषु चरति पादपेष्विव मर्कटः ।। १५

पञ्चद्वाराणि मनसश्चक्षुरादीन्यमून्यलम् ।

दग्धेन्द्रियाभिधानानि तावदालोकयाम्यहम् ।। १६

हे हे हतेन्द्रियगणाः किं मे बोधाय नेह वः ।

वेला विलुलिताम्बूनामब्धीमिव चञ्चलाः ।। १७

मा कुरुध्वमनर्थाय चापलं चपलाशयाः ।

स्मरतातीतवृत्तीनि दुःखजालानि भूरिशः ।। १८

रूपाणि मनसो यूयं जडा एव किलाधमाः ।

जडे तूत्सिक्तता व्यर्थे मृगतृष्णेव वल्गति ।। १९

असारात्मस्वरूपाणामनालोकवती सदा ।

अन्धानामुद्धतिर्येयं सा दृश्यायैव जायते ।। 5.82.२०

चिदात्मा भगवान्सर्वं साक्षित्वेन करोम्यहम् ।

हतेन्द्रियगणा यूयं किं निरर्थकमाकुलाः ।। २१

मिथ्यैव मे विवल्गन्ति नीरूपा नयनादयः ।

अलातचक्रप्रतिमाः सर्परज्जुभ्रमोपमाः ।। २२

तेनात्मना बहुज्ञेन निर्ज्ञाताश्चक्षुरादयः ।

मनागपि न संबन्धो द्युपातालतलाद्रिवत् ।। २३

भीतः पान्थ इवाहिभ्यः पुक्कसेभ्य इव द्विजः ।

दूरे तिष्ठति चिन्मात्रमिन्द्रियेभ्यस्त्वनामयम् ।। २४

चित्सत्तामात्रकेणालं संक्षोभो भवतां मिथः ।

तिष्ठति स्वैरमादित्ये दिनकार्यवतामिव ।। २५

चित्त चारण चार्वाक चतुर्दिक्कुक्षिभिक्षुक ।

श्वेव व्यर्थमनर्थाय मैवं विहर हे जगत् ।। २६

अहं चिद्वदिति व्यर्थमसत्या तव वासना ।

अत्यन्तभिन्नयोरैक्यं नास्ति चिन्मनसोः शठ ।। २७

जीवाम्येवाहमित्येषा तवाहंकारदुर्मतिः ।

मिथ्यैव जाता दुःखाय न सत्या सत्यवर्जिता ।। २८

अहंकारोदये सोऽस्मीत्येतां संरब्धतां त्यज ।

न किंचिदपि मूर्ख त्वं किं व्यर्थं तरलायसे ।। २९

संविच्चित्त्वमनाद्यन्तं संविदोऽन्यन्न विद्यते ।

देहेस्मिंस्तन्महामूर्ख किं त्वं स्याश्चित्तनामकम् ।। 5.82.३०

विषपर्यवसानेयं रसायनवदुत्थिता ।

भोक्तताकर्तृताशङ्का बत चित्त मुधैव हि ।। ३१

मोपहासपदं गच्छ मूर्खेन्द्रियगणाश्रयम् ।

न कर्ता त्वं न भोक्ता त्वं जडोऽस्यन्येन बोध्यसे ।।३२

कस्त्वं भवसि भोगानां के वा भोगा भवन्ति ते ।

जडस्यात्मैव ते नास्ति बन्धुमित्रादि तत्कुतः ।। ३३

यज्जडं तद्धि नास्त्वेव सदेवासत्तयान्वितम् ।

ज्ञत्वकर्तृत्वभोक्तृत्वमन्यत्वानामसंभवात् ।। ३४

प्रत्यक्चेतनरूपश्चेत्त्वं तदात्मैव ते वपुः ।

भावाभावमयी चित्तसत्ता ते केव दुःखदा ।। ३५

यथा कर्तृत्वभोक्तृत्वे मिथ्यैवाधिगते त्वया ।

मया ते हि प्रमार्ज्येते शृणु युक्त्या कथं शनैः ।। ३६

स्वयं तावद्भवानेष जडो नास्त्यत्र संशयः ।

जडस्य कीदृक्कर्तृत्वं नृत्यन्तीह कथं शिलाः ।। ३७

उपजीव चिरं तस्माच्छुद्धं तद्भागमैश्वरम् ।

जीवसीच्छसि हंसि त्वं वृथा यासि विवल्गसि ।३८

क्रियते यत्तु यच्छक्त्या तत्तेनैव कृतं भवेत् ।

लुनाति दात्रं पुंशक्त्या लावकः प्रोच्यते पुमान।।३९

हन्यते यस्तु यच्छक्त्या स तेनैव हतो भवेत् ।

निहन्ति खड्गः पुंशक्त्या हन्तैव प्रोच्यते पुमान् ।।5.82.४०

पीयते यस्तु यच्छक्त्या पीतं तेनैव तद्भवेत् ।

पात्रेण पीयते पानं पाता यस्तूच्यते नरः ।। ४१

प्रकृत्येवासि सुजडः समस्तज्ञेन बोध्यसे ।

तेनात्मैवात्मनात्मानं चिनोतीदं हि नो भवत् ।। ४२

अनारतं बोधयति त्वामात्मा परमेश्वरः ।

बोधनीया बुधैर्मूढाः किलावृत्तिशतैरपि ।। ४३

आत्मसत्तैव बोधैकरूपिणी स्फुरतीह हि ।

तयैव चित्तशब्दार्थावङ्गीकृत्य त्वया स्थितम् ।। ४४

एवं चित्त त्वमज्ञानादात्मशक्तेरुपागतम् ।

ज्ञाने त्वया विगलितं तीव्रे हिममिवातपे ।। ४५

तस्यामृतं त्वं मूढं त्वं नासि त्वं परमार्थतः ।

तदेवाहमिति व्यर्थमतो मास्त्वसुखाय ते ।। ४६

असत्या चित्तकलना इन्द्रजाललता इव ।

विज्ञानमात्रमेवेह ब्राह्ममङ्गं विजृम्भितम् ।। ४७

नरामरजगद्रूपैर्ब्राह्मी शक्तिरुदेत्यलम् ।

सामुद्रकणकल्लोलजालैर्वेलेव वल्गति ।। ४८

चिन्मयश्चेद्भवेर्मूढ तत्तस्मात्परमात्पदात् ।

नित्यमव्यतिरिक्तं त्वं किमन्यत्परिशोचसि ।। ४९

सर्वगं सर्वभावस्थं सर्वरूपं हि तत्पदम् ।

तत्प्राप्तौ सर्वमेवाज्ञ प्राप्तं भवति सर्वदा ।। 5.82.५०

न त्वमस्ति न देहोस्तिब्रह्मास्तीह महत्स्फुरत् ।

अहंत्वमिति निःस्पन्दे स्फुरत्यार्तिर्हि कस्य का ।।५१

आत्मा चेत्त्वं तदात्मैव सर्वगोऽस्तीह नेतरः ।

आत्मनोऽन्यज्जडत्वं चेत्तत्त्वं नास्त्यस्ति तद्वपुः।।५२

आत्मैव सर्वं त्रिजगत्तदन्यत्तु न किंचन ।

तत्त्वं किंचित्त्वमात्मान्यद्यदि तत्त्वं न किंचन ।। ५३

अहं त्विदमहं तन्म इति व्यर्थं किमीहसे ।

असद्वपुः किं स्फुरति शशशृङ्गेण को हतः ।। ५४

तृतीया कलना नास्ति चिज्जडांशेतरा शठ ।

छायातपनयोर्मध्ये तृतीयेवानुरञ्जना ।। ५५

सत्यावलोकनाज्जाते चित्तजाड्यदृशोः क्षये ।

संपद्यते यत्तु तज्जं स्वसंवेदनमात्रकम् ।। ५६

तेन मूढ न कर्तृत्वं न भोक्तृत्वं तवापि हि ।।

तदेवासि परं ब्रह्म त्यज मौर्ख्यं भवात्मवान् ।। ५७

केवलं ज्ञत्वविषयमुपदेशार्थसिद्धये ।

त्वया करणभूतेन करोत्यात्मेति कथ्यते ।। ५८

असत्स्वरूपं करणं जडं निरवलम्बनम् ।

निःस्पन्दनं न स्यन्देत कर्तृसंबोधनं विना ।। ५९

अकर्तुः करणस्यास्य शक्तिः काचिन्न विद्यते ।

दात्रस्य लावकाभावे कर्तुं किमिव शक्तता ।। 5.82.६०

खड्गप्रहारविच्छेदक्रियायां पुंसि शक्तता ।

न खड्गे सुजडे चित्त सर्वाङ्गेष्वपि शक्तता ।। ६१

तस्मान्नासि सखे कर्तृ मा व्यर्थं दुःखभाग्भव ।

परार्थं क्लेशिता मूर्ख प्राकृतेषु न शोभते ।। ६२

ईश्वरो नेदृशः शोच्यो यस्त्वया सदृशो भवेत् ।

न च तस्य कृतेनार्थो नाकृतेनेह कश्चन ।। ६३

गर्वात्तूपकरोम्येनमिति केवलमल्पधीः ।

क्लिश्यते वसतां त्वर्थो न किंचिदुपयुज्यते ।। ६४

कर्तुर्भोगेश्वरस्यैवमर्थे चेदनुवर्तसे ।

तदस्य काचिन्नेच्छेह तृप्तत्वात्सर्वदैव हि ।। ६५

अकृत्रिमावभासेन सर्वगेन चिदात्मना ।

एकेनैवेदमापूर्णं कल्पनैवास्ति नेतरा ।। ६६

एकानेकावभासेन समस्तेन तदात्मना ।

आत्मन्येवान्तरात्मान्तः क्रियते किं किमिष्यते ।।६७

त्वादृशस्य तु दृष्ट्यैव क्षुब्धता जयते मुधा ।

आलोक्य राजमहिषीं यूनो मदमयीं तथा ।। ६८

आत्मना सह संबद्धे चेतः कर्त्रसि सुन्दर ।

किंतु नास्यासि संबन्धि कुसुमस्य यथा फलम्।। ६९

द्वितीयेन समं यैषा तत्तावद्भवनैकता ।

सा संबन्धगतिः प्रोक्ता प्राग्द्वित्वादधुनैकता ।। 5.82.७०

नानाप्रकाररचना नानारूपक्रियोन्मुखी ।

सुखदुःखदशाऽहेतुर्भवान्नैकविधास्मृता ।। ७१

संबन्धः समयोर्दृष्टस्तथाऽर्धसमयोरपि ।

न विलक्षणयोश्चान्यस्तस्मिन्सति जगत्त्रये ।। ७२

द्रव्यान्तरगुणा द्रव्याण्याश्रयन्ति बहून्यलम् ।

संविदश्च्यवनं दुःखं संविदो मा च्युतो भव ।। ७३

एतावतैकध्यानेन नित्यध्यानोऽथवात्मदृक् ।

अभावे दुःखदस्यान्तर्दृशा दृश्यस्य वस्तुनः ।। ७४

संकल्पोन्मुखतां विद्धि दुःखदां संविदश्च्युतिम् ।

जडेषूपलभूतेषु मनोदेहेन्द्रियादिषु ।। ७५

कीदृशी कर्तृता चित्त पुष्पं व्योम्नि कथं भवेत् ।

निरस्तकलना पङ्के मननध्वंसरूपिणि ।। ७६

न चैवात्मनि कर्तृत्वं संभवत्यम्बराङ्गवत् ।

अयं केवलमात्मैव नानानानातयात्मनि ।। ७७

स्फुरत्यब्धिरिवाम्भोभिः फेनबुद्बुदवीचिभिः ।

आभासमात्रे सर्वस्मिन्स्फुरत्यस्मिंश्चिदात्मनि ।। ७८

द्वितीया नास्ति कलना तप्ताङ्गार इवाम्बुधौ ।

कलनारहिते देवे देहे मनसि वा जडे ।। ७९

संवित्संवेद्यनिर्मुक्ता सारं सुन्दर नेतरत् ।

इदमन्यदिदं नान्यच्छुभं वाऽशुभमेव च ।। 5.82.८०

इत्यसत्कल्पना नास्ति यथा नभसि काननम् ।

संवेद्यरहितं संविन्मात्रमेवेदमाततम् ।

तत्रायमहमन्योऽयमित्यसत्कलना कथम् ।। ८१

अनादिमति नीरूपे सर्वगे विततात्मनि ।

आरोपयेत्कः कलनामृग्वेदं व्योम्नि को लिखेत् ।। ८२

नित्योदिते सकलवस्तुपदार्थसारे

संवित्स्थिते भरितनिर्भरभूरिदिक्कम् ।

आत्मन्यसत्यमिव साधु गतेऽमलत्वात्

क्षीणौ सुखासुखलवौ मम वै स मोहः ८३

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषूपशमप्रकरणे इन्द्रियानुशासनयोगोपदेशो नाम द्व्यशीतितमः सर्गः ।। ८२।।